# संस्कृत वार्ता:

दिनाङ्क : 18/04/2026 सायम् - 06:20

आदौ मुख्यवार्ता:

- प्रधानमन्त्री नरेन्द्रमोदी अद्य रात्रौ सार्ध-अष्टवादने राष्ट्रं सम्बोधयिष्यति।
- संसदि लोकसभा राज्यसभा च उभे सदने अद्य अनिश्चितकालाय स्थगिते।
- केन्द्रीय-मन्त्रिमण्डलेन अद्य 'भारत-समुद्रीय-बीमा-कोषः' इति नाम्ना एकस्य देशान्तर-बीमा-कोषस्य निर्माणाय स्वीकृतिः प्रदत्ता।
- तमिलनाडु पश्चिमबङ्गे च विधानसभा-निर्वाचनार्थं प्रचारः अद्य तीव्रतरो जातः।
- आई.पी.एल. क्रिकेट्-क्रीडायां रॉयल चेलेंजर्स बैंगलुरु दलेन दिल्ली कैपिटल्स दलाय षड्सप्तत्यधिकैशतधावनांकां लक्ष्यं समुपस्थापितम् ।

अथ वार्ता: विस्तरेण

प्रधानमन्त्री-सम्बोधनम्

प्रधानमन्त्री नरेन्द्रमोदी अद्य रात्रौ सार्ध-अष्टवादने राष्ट्रं सम्बोधयिष्यति। लोकसभया महिला-आरक्षण-सम्बद्धं संविधान-संशोधन-विधेयकं पारितं कर्तुं द्वि-तृतीयांश-बहुमतं न प्राप्तम् । एतदर्थम् एकदिवसानन्तरम् एतत् सम्बोधनं भविष्यति, यतः विपक्षीयदलानि अस्य समर्थनं न कृतवन्तः। परिसीमन-प्रक्रियया सह संयुक्तं महिला-आरक्षणस्य समुपस्थापितं विधानम् एतत् सुदीर्घचर्चायै अनन्तरम् अपि स्वलक्ष्यप्राप्तये विफलं जातम्।

संसद-अनिश्चितकाल स्थगित

संसदि लोकसभा राज्यसभा चोभे सदने अद्य अनिश्चितकालाय स्थगिते। अनेन सह अस्य वर्षस्य जनवरी मासस्य अष्टाविंशतिः दिनाङ्कात् आरब्धं एतत् आय-व्यय-सत्रम् समाप्तिं गतम् । लोकसभायां समापनाभिभाषणे अध्यक्षः ओम बिरला अवदत् यत् आय- व्यय-सत्रस्य कालखण्डे सदनस्य उत्पादकता त्रिनवतिः-प्रतिशतमिता आसीत्। सहैव सदनस्य अधुना यावत् एकत्रिंशत् उपवेशनानि जातानि। श्री बिरला अवदत् यत् सत्रस्य कालखण्डे द्वादश-प्राशासनिक-विधेयकाः प्रस्तुताः, तथा च नव-विधेयकाः पारिताः

अभवन्। एतेषु षड्विंशत्यधिकद्विसहस्रतमवर्षस्य वित्त-विधेयकः , पञ्चविंशत्यधिकद्विसहस्रतमवर्षस्य ऋणग्रस्तं संशोधनं विधेयकः , षड्विंशत्यधिकद्विसहस्रतमवर्षस्य आन्ध्रप्रदेश-पुनर्गठनस्य संशोधन-विधेयकः, षड्विंशत्यधिकद्विसहस्रतमवर्षस्य जनविश्वास - प्रावधान-संशोधन- विधेयकः ,षड्विंशत्यधिकद्विसहस्रतमवर्षस्य तथा केन्द्रीय-सशस्त्र-आरक्षि-बल विधेयकः च समाविष्टाः सन्ति। शून्यकाले सदस्यैः षड्विंशत्यधिकैकशत संख्यकाः सार्वजनिक-महत्त्वस्य विषयाः उपस्थापिताः।

राज्यसभायां समापनाभिभाषणे अध्यक्षः सी. पी. राधाकृष्णन् उक्तवान् यत् सदनमाहत्य सप्तपञ्चाशतदधिकैकशतहोरा पर्यन्तं संचालितम्। अस्य सत्रस्य उत्पादकता प्रायः दशाधिकैकशतप्रतिशतमिता आसीत्।

राज्यसभा-अध्यक्षः अवदत् यत् सत्रस्य कालखण्डे प्रधानमन्त्री नरेन्द्र मोदी पश्चिम-एशियायां प्रवर्तमानस्य संघर्षस्य विषये तथा भारतस्य समक्षं उपस्थितासु, विशेषतः ऊर्जा-आवश्यकतानां पूर्तिमालक्ष्य वक्तव्यं प्रदत्तवान्। सः अवदत् यत् सदने वाणिज्य-उद्योग-मन्त्रिणा भारत-अमेरिका-द्विपक्षीय-व्यापार-संधि विषये तथा विदेश-मन्त्रिणा पश्चिम-एशियायाः स्थितेः विषये प्रदत्तेषु स्व-संज्ञान-वक्तव्येषु अपि ध्यानं दत्तम्।

केन्द्रीय-मन्त्रिमण्डलस्य निर्णयाः

केन्द्रीय-मन्त्रिमण्डलेन अद्य 'भारत-समुद्रीय-बीमा-कोषः' इति नाम्ना एकस्य देशान्तर-योगक्षेम-कोषस्य निर्माणाय स्वीकृतिः प्रदत्ता। अस्य कृते अशीत्युत्तरनवशताधिक द्वादशसहस्र कोटि-रूप्यकाणां 'सार्वभौम-प्रत्याभूतिः' अपि प्रदत्ता, येन निरन्तरं समुद्रीय-बीमा-सुविधा उपलभ्येत। मन्त्रिमण्डल-सभायाः अनन्तरं नवदिल्ल्यां वार्ताहरैः सह वार्तालापावधौ सूचना-प्रसारण-मन्त्री अश्विनी वैष्णवः उक्तवान् यत्, एषः कोषः सुनिश्चितं करिष्यति यत् भारतीय-व्यापाराय अन्ताराष्ट्रिय-स्थानेभ्यः भारतं प्रति, भारततः च बहिः गच्छतां पोतानां कृते सुलभ-बीमा-सुविधा प्राप्येत। असाधु-समुद्रीय-मार्गेषु गमनागमन-समये अपि एषा सुविधा सुलभा भविष्यति। एषः निर्णयः अस्य वर्षस्य जनवरी-मासस्य प्रथमदिनाङ्कतः प्रभावि भविष्यति ।

विराम

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय- तन्त्रांशे अपि उपलब्धो भविष्यति।

तमिळनाडु-निर्वाचनप्रचारः

तमिळनाडु-राज्ये अद्य प्रधानमन्त्री भाजपेति दलस्य वरिष्ठनेता च नरेन्द्रमोदी राष्ट्रिय-जनतान्त्रिक-गठबन्धनस्य अभ्यर्थिनां पक्षे मतदानार्थं कोयम्बत्तूर-नगरे प्रचारं करिष्यति। विमानपत्तनात् कार्यक्रमस्थलं 'कोडीशियां' प्रति सः मार्ग-प्रदर्शन माध्यमेन यास्यति। अपरपक्षे, डी.एम.के. -प्रमुखः मुख्यमन्त्री च एम.के. स्टालिन् 'परिसीमन-विधेयकमालक्ष्य भाजपेति दलस्य अथ च ए.आई.ए.डी.एम.के इत्यस्य आलोचनां कुर्वन् अस्ति। काङ्ग्रेस-नेता राहुल गान्धी पोन्नेरी-क्षेत्रे प्रचारं कुर्वन् राज्येन सह स्वस्य आत्मीयसम्बन्धं स्मृतवान्।

पश्चिमबङ्ग-निर्वाचनप्रचारः

ग्रीष्मस्य आर्द्रतायाः च प्रकोपे सत्यपि, पश्चिमबङ्गे विधानसभा-निर्वाचनार्थं राजनैतिक-प्रचारः अद्य तीव्रतरः जातः। तृणमूल-काङ्ग्रेस-प्रमुखः मुख्यमन्त्री च ममता बनर्जी स्वदलस्य अभ्यर्थिनां समर्थनार्थं हावड़ा-मण्डले एकां जनसभाम् अकरोत्। तृणमूल-नेता अभिषेक बनर्जी एकेन मार्ग-प्रदर्शनेन सह सम्मिलितः, सः पूर्व-बर्धमान-मण्डले अन्यासु जनसभासु अपि भागं ग्रहीष्यति इति सम्भावना वर्तते।

भाजपा-नेता प्रतिपक्षनेता च सुवेन्दु अधिकारी पूर्व-मेदिनीपुर-मण्डले एकां जनसभाम् अकरोत् । असम-उत्तरप्रदेश-मध्यप्रदेशानां मुख्यमन्त्रिणः अपि भाजपा-दलस्य वरिष्ठनेतारः पश्चिमबङ्गस्य विभिन्न-मण्डलेषु जनसभासु भागं गृहीतवन्तः। अपरपक्षे, काङ्ग्रेस-नेता तेलङ्गाना-राज्यस्य मन्त्री च मोहम्मद अजहरुद्दीनः मुर्शिदाबाद-मण्डले जनसभासु सम्मिलितः। वामपन्थी-दलानि अन्यानि च राजनैतिकदलानि अपि क्षेत्रेषु लघु-जनसभाः प्रचारान् च कृतवन्तः।

राष्ट्रिय-महिला-आयोगः

महाराष्ट्रस्य अमरावती-मण्डले परातवाड़ा-प्रकरणस्य प्रगति-समीक्षार्थं राष्ट्रिय-महिला-आयोगस्य अध्यक्षा विजया राहटकर महोदया एकस्यां उच्चस्तरीय-समीक्षा-सभायां अध्यक्षतां कृतवती। प्रकरणमिदं युवतीनां आपत्तिजनक -चलच्चित्राणां निर्माण-प्रसारण-कथित-अपराधेन सम्बद्धम् अस्ति। राष्ट्रिय-महिला-आयोगेन एकस्मिन् वक्तव्ये प्रोदीरितं यत् एषा घटना शोषणाय तन्त्रांशस्य दुरुपयोगः, सामग्री-प्रसारणस्य व्याप्तिः तथा च पीडितानां सुरक्षा-मर्यादा-विषये गभीरां चिन्तां जनयति।

आयोगेन सम्बन्धित-अधिकारिणः आदिष्टाः यत् ते 'फोरेन्सिक'-विश्लेषणं इति (न्यायिक-वैज्ञानिक-परीक्षणं) त्वरितं कुर्वन्तु । सहैव प्रतिपञ्चदिनेषु आयोगे प्रगति-विवरणं प्रस्तुवन्तु । विवरण-प्रस्तुति-समये ग्रामीण-आरक्षक-अधीक्षकः विशाल-आनन्दः न्यवेदयत् यत् मुख्य-अभियुक्तेन सह अधुना यावत् अष्ट-अभियुक्ताः निगृहीताः सन्ति।

संस्कृत - साप्ताहिकी

प्रियाः श्रोतारः, संस्कृतजगता सम्बद्धैः विभिन्नैः क्रियाकलापैः संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्याः एफ.एम.गोल्ड-प्रवाहिकातः रविवासरे मध्याह्ने सार्धैक-वादनतः भविष्यति, भवन्तः सर्वे श्रोतुं प्रभवन्ति ।

आईपीएल-क्रिकेट

आई.पी.एल. क्रिकेट्-क्रीडायां अद्य रॉयल चेलेंजर्स बैंगलुरु दिल्ली कैपिटल्स् दलयोः मध्ये स्पर्धा प्रचलति। प्रप्रथमं क्रीडयता रॉयल चेलेंजर्स बैंगलुरु दलेन दिल्ली कैपिटल्स् दलाय षड्सप्तत्यधिकैशतधावनांकां लक्ष्यं समुपस्थापितम् । अपरतः द्वितीयाम् स्पर्धायाम् हैदराबाद नगरे सनराइजर्स हैदराबाद दलम्, चेन्नई सुपरकिंग्स दलम् सम्मुखी करिष्यति। इयम् स्पर्धा सार्ध सप्तवादने आरप्स्यते।

।। इति वार्ता: ।।